ॐ लक्ष्मीनारायणं वंदे देवीं त्रिपुरसुंदरीं गुरून्नाथमनाथानां श्रीनिवासं निरंतरमहं भजे १ बालानां शास्त्रसिद्ध्यर्थं लेशतो बोधयत्यसौ मता मीमांसाप
रिभाषेयं क्रियते कृष्णयज्वना २ इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्या एवं मीमांसा कृता अथ मीमांसाकोऽयं धर्मो वेदानुष्ठानोपयोगितया विचा
रितः तत्र वेदबोधितेष्टसाधनताको धर्मः यथा यागादिः वेदबोधितानिष्टसाधनताकोऽधर्मः यथा कलंजभक्षणादिः तयोश्च वेदः स्मृ
त्याचारश्च प्रमाणं तत्र वेदः स्वतंत्रप्रमाणं इतरौ तु वेदमूलकतया प्रमाणं तत्र वेदो द्विविधः मंत्ररूपो ब्राह्मणरूपश्चेति तत्र प्रयोगकाली
नार्थस्मरणहेतुर्मंत्राः तेषां मंत्राणामुपयोगः इति वक्ष्यते प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः विधायकं वाक्यं ब्राह्मणं ब्राह्मणं चोदकं विधिवादः तस्य वि
षयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते तच्च नेकविधं कर्मोत्पत्तिवाक्यं गुणवाक्यं फलवाक्यं फलगु
णवाक्यं सगुणकर्मोत्पत्तिवाक्यमित्यादिभेदात् तत्र येन वाक्येन देवकर्तव्यमिति बोध्यते तत्कर्मोत्पत्तिवाक्यं यथाग्निहोत्रं जुहोतीति अत्राग्नि
होत्रहोमः कर्तव्यतया विधीयत इति कर्मोत्पत्तिवाक्यं विहिते कर्मणि तद्गतयागद्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यं यथा दध्ना जुहोतीति
गुणवाक्यमिदं कर्मगततया विहितत्वमेव दध्नो गुणत्वं अत्र होमस्योद्देश्यत्वं नाम प्रमाणांतरप्राप्तत्वे सति विधेयान्वयितया निर्दिश्यत्वं तत्त्वं च मानां
तरप्राप्तस्य पुनः कथ्यमानरूपत्वं अनु [illegible] वा घत्वं [illegible] दध्यादिगुणान्वयितया प्राधान्येन च दध्यादेस्तु मानांतराप्राप्तत्वे सति विधेयत्वं हो
मसाधनतया च होमापेक्षया गुणत्वं पुरुषेणानुष्ठीयमानतया चोपादेयत्वं चेति अत्र मानांतरप्राप्तत्वं मानांतरज्ञातत्वं अप्राप्तत्वं चाज्ञातत्वमिति
बोध्यं उत्पन्नस्य कर्मणः फलाकांक्षायां फलसंबंधबोधको विधिः फलविधिः यथाग्निहोत्रं जुहुयात्स्वर्गकाम इति अत्रायं स्वर्गकामयेत समस्तसाधनत्वे
नाग्निहोत्रनामकं होमं भावयेत् कुर्यादित्यग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसंबंधो बोध्यत इति फलवाक्यमिदं प्राप्तकर्माश्रितत्वे फलाय गुणवि
धिः फलाय गुणवाक्यं यथा दध्नेंद्रियकामस्य जुहुयादित्यत्राग्निहोत्रवाक्योत्पन्ने होमे होमाश्रितेंद्रियफलाय दधिरूपो गुणो विधीयते होमाश्रितेन दध्ना

इष्टिपस्वं फलं भावयेदिति होमाख्येन होमकारकीभूतेनेत्यर्थः अथमेव गुणफलविधिर्गुणकामविषयत्वे चोच्यते यद्देवतादिगुणविशि
ष्टकर्मविधायकं वाक्यं गुणकर्मणो तद्वाक्यं यथा सोमेन यजेतेति अत्र सोमलताविशिष्टो यागो विधीयते विशिष्टविधायकविशेषणा
र्था द्विधः काचित्कर्मानाति वाक्यमेव फलसंबंधबोधकमपि भवति यथोद्भिदा यजेत पशुकाम इति अत्रोद्भिन्नामको यागो वाक्यान्तराद्वि
हितः एव पशुकामस्य पशुफलाय विधीयते इमे कर्मवेदं वाक्यं फलसाधनयागकर्मविधायकं प्रधानविधिरेवं गुणविधिभिरेकवाक्यतामस्ता
कतामापन्नः सन्सर्वांगविशिष्टप्रधानप्रयोगविधायकत्वात्प्रयोगविधिरित्युच्यते यथाऽग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्राग्निहोत्रहोमेन
स्वर्गं भावयेदित्यर्थः प्रतीयते भावयेत् उत्पादयेत् कुर्यादिति यावत् अत्र कथमनेन होमेन स्वर्गं कुर्यादिति कथंभावाकांक्षा जायते पश्चात्कुतोरे
णैधीभावं कुर्यादित्युक्ते भवत्याकांक्षा कथमनेन हैधीभावं कुर्यादिति तत्र आचमननियतनादिसहायेनेति गम्यते तद्दना पाग्निं प्रणयन्त्यग्निस्
समिधमादधातीत्याद्यंगविधिविहितप्रणयनसमिदाधानाद्युपस्तरणशोधनादिकांगकलापजनितोपकारसहितेनाग्निहोत्रहोमेन स्वर्गं
कुर्यादिति प्रकरणकल्पितेन महावाक्येन स्वर्गोपसांगाग्निहोत्रप्रयोगो विधीयते अयं तादृशः प्रयोगविधिः अंगजातमेवेत्यभावं अतिकर्तव्य इति
ताचेति चोच्यते अत्राग्निहोत्रहोमः प्रधानं प्रणयनादिकं सर्वमंगं ननु इदमनुपपन्नं आशुतरविनाशिनो कर्मणः कालान्तरभाविस्वर्गादि
फलसाधनत्वानुपपत्तेरिति चेन्नैवं विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्मणां कालान्तर
भाविफलसाधनत्वोपपत्त्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते तत्र अपूर्वस्य यागादेः पूर्वद्वारत्वं स्वर्गसाधनत्वं न साक्षात् तदेव फलाव्यवहितकार
णत्वं च प्राधान्योदीत्यांगविशिष्टस्य प्रधानस्य भवति न प्रधानमात्रस्य प्रधानमात्रादेव फलस्योत्पत्तिर्न तत्र च सिद्धेरंगानामानर्थक्यापत्तेः ननु सर्वां
गविशिष्टस्य प्रधानस्यापूर्वजनकत्वमयुक्तं आशुतरविनाशिनः प्रधानस्यांगसाहित्यासंभवादिति चेन्न प्रधानकर्मणः स्वांगैः सह साहित्या
फलापूर्वजनने २

भावेपिउत्पत्त्यपूर्वद्वारासाहित्यसंभवात्प्रधानस्यसर्वांगसाहित्यसिद्ध्यर्थंप्रधानकर्मयस्मात्पूर्वंयोमध्येप्रधानमात्रजन्यमुत्पत्तिनामकंकिंचिदपूर्वम
स्तीत्यंगीकारात्एवमंगानामपिपरस्परसहितानामेवप्रधानोपकारकत्वात्तेषांस्वरूपेणसाहित्याभावात्तत्तदुत्पत्त्यपूर्वद्वारासाहित्यंबोध्यं
२ अंगानांप्रधानोपकारकत्वंनामप्रधानस्यफलापूर्वजननेसामर्थ्येनानुग्रहीकरणमेवदर्शपूर्णमासयोस्तुविशेषः यदाग्नेयोष्टाकपालोमावास्यायां
चपौर्णमास्यांचाच्युतोभवतीत्याग्नेययागोविहितः ताभ्यामेतमग्नीषोमीयमेकादशकपालंपूर्णमासेप्रायच्छदित्यग्नीषोमीययागोविहितः
उपांशुयाजमंतरायजतीति उपांशुयागः तावब्रूतामग्नीषोमावाज्यस्यैवनावुपांशुपौर्णमास्यांयजेरन्नितिवासौपौर्णमास्यांविहितः एतानि
पौर्णमास्यांप्रधानानित्रीणिआग्नेयाग्नीषोमीयोपांशुयाजानांतत्त्वावगतपौर्णमासीकालसंबंधनिमित्तीकृत्ययएवंविद्वान्पौर्णमासींयजेत
इतिविद्वद्वाक्येपौर्णमासीपदेनैकवचनांतेनसमुदायरूपेणानुवादः तेनवेदेयत्रयत्रपौर्णमासीशब्दस्तत्रतत्राग्नेयादिसमुदायोपस्थितिः ननुयदा
ग्नेयइतिवाक्येयागवाचकपदस्याश्रवणात्कथंयागविधायकत्वमितिचेन्मैवं अग्निर्देवतास्यपुरोडाशस्येत्यर्थेविहितदेवतातद्धितान्ताग्नेयशब्दः
तस्यपुरोडाशपदसामानाधिकरण्यात्द्रव्यदेवतासंबंधोवगतः सयागमंतरानसंभवतिद्रव्यदेवतासंबंधस्ययागादन्यत्रक्रियायामसंभवात्यागक्रि
यायामेवसंभवोवाच्यः देवतोद्देशेनद्रव्यत्यागस्ययागरूपत्वांगीकारात् अतःश्रुतद्रव्यदेवतासंबंधानुमितोयागोयजेतेतिकल्पितपदेनविधीयतेअग्ने
पे४ दैवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेनेष्टंभावयेदिति एवंयत्रयत्रद्रव्यदेवतासंबंधमात्रंश्रूयतेसौर्यंचरुंनिर्वपेदित्यादौतत्रसूर्यदेवता
संबंधानुमितोयागोविधीयतइतिनकश्चिद्दोषः ननूपांशुयाजवाक्येयाज्ञिस्मरणेपिविधिप्रत्ययलिंगादेरभावात्कथंविधायकत्वमितिचेन्मैवंयजती
त्यस्ययजेतेतिविपरिणामेनविधायकत्वसंभवात् एवंयत्रलिंगादिर्नश्रूयते[illegible]तिसमिधोयजतीत्यादौतत्रविपरिणामोबोध्यः केचित्तुयजतीत
स्यपंचमलकारत्वांगीकाराद्विधायकत्वसंभवइत्याहुः नन्वैन्द्रंदध्यमावास्यायामैन्द्रंपयोमावास्यायामितिवाक्यविहितौसान्नाय्ययागौयदाग्नेयइतिवाक्यवि

दिताग्नेयश्चामावास्यायांप्रधानानिएवंत्रयाणांयएवंविद्वानमावास्यांचयजतइतिवाक्येऽमावास्यामितिनाम्नाद्वितीयैकवचनांतेनसमुदायरूपेण
नुवादःजेनेवंदेयत्रदर्शशब्दोऽमावास्याशब्दोवाश्रुतस्तत्रसमुदायोपस्थितेःत्रिकस्यत्रिकस्यामावास्यापौर्णमासीशब्दाभ्यांसमुदायरूपेणविद्वद्वाक्ये
ऽनुवादस्यप्रयोजनंतुदर्शपौर्णमासाभ्यांस्वर्गकामोयजेतेत्यादौद्विवचनोपपत्तिःअन्यथाषण्णामाग्नेयादियागानांबहुत्वाद्दर्शपौर्णमासैरितिबहुव
चनंस्यात्समानांतरेणप्राप्तार्थस्यपुनःश्रवणंअनुवादःतथाफलवदाग्नेयादिसन्निधावाम्नातानिप्रयाजाऽऽज्यभागानुयाजादीनिषण्णांयागाना
मंगभूतानिएवंस्थितेदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यस्यायमर्थःदर्शपूर्णमासाभ्यांपरस्परसाहित्याभ्यांस्वर्गापूर्वंकुर्यादितितत्रकथंकालद्वय समुदा
वर्तिनोःसमुदाययोःपरस्परसाहित्यमितित्याकांक्षायांस्वरूपेणसाहित्याभावेपित्रिकात्त्रिकादेकैकमपूर्वंजायतेतद्वाराद्वयोःसमुदाययोःसाहित्यमि याभ्यां
त्युच्यतेएकैकस्यत्रिकस्यापित्रिकापूर्वजनकत्वंकथमित्याकांक्षायांप्रयाजानुयाजादिपूर्वोत्तरांगकलापविशिष्टस्यैकैकस्यत्रिकस्यसमुदायापूर्वज
नकत्वमुच्यतेएकैकत्रिकस्यसर्वांगसाहित्यंस्वरूपेणनसंभवतीतित्रिभिर्यागैर्ह्येपुनरन्यपूर्वाणिजायंतेतद्वारासर्वांगसाहित्यंअंगानामपिप्रयाजादी
दे नांस्वरूपेणप्रधानसाहित्याभावात्तदुत्पन्नापूर्वद्वारासाहित्यंवाच्यंतथाचप्रधानजन्योत्पत्त्यपूर्वाणिप्रयाजादिजन्योत्पत्त्यपूर्वैःसाहित्यंपदस्तेनदेवप्रधाना
नामंगानांविशिष्टत्वरूपसांगत्वंएवंचपौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैःप्रयाजादिजन्योत्पत्त्यपूर्वसचिवैःसमुदायापूर्वमेकंजन्यतेतथादर्शेपिआग्नेय
१५ द्व्यजन्यैस्त्रिभिरपूर्वैरंगोत्पन्नापूर्वसचिवैरेकंत्रिकापूर्वंताभ्यामाग्नेयाद्युत्पन्नापूर्वत्रितयादिनयजन्याभ्यांफलजननकीभूतमहापूर्वंफलापूर्वनामकंजन्यतेत
नस्वफलमितितथाचसर्वांगोपकृताभ्यांदर्शपौर्णमासाभ्यामपूर्वद्वारास्वर्गंकुर्यादितिफलापूर्वनिष्पन्नयेसांगप्रधानकर्तव्यतावोधकोविधिःप्रयोगवि
धिरितिसिद्धंपुनरपिविधिस्त्रिविधःअपूर्वविधिर्नियमविधिःपरिसंख्याविधिश्चेतितत्रयोविधिरत्यंताप्राप्तमर्थंप्रापयतिसोऽपूर्वविधिःयथादर्शपौर्णमास
प्रकरणेव्रीहीन्प्रोक्षतीतिएतद्विध्यभावेदर्शपूर्णमासीयव्रीहीणांप्रोक्षणंकथमपिनप्राप्नोतिएतद्विधिसत्वेतुनसंबंधिव्रीहिप्रोक्षणंप्राप्नोत्येवमत्यंताप्राप्त

त्रिकापूर्वंजन्यतेताभ्यां

प्रोक्षणप्रापकत्वादपूर्वविधिः द्वितीयः यद्वै प्राप्तमर्थं नियमयति स नियमविधिः तत्रैव व्रीहीनवहंतीति एतद्विध्यभावे दर्शपौर्णमासिके
षु व्रीहीषु सति वाक्यावगतपुरोडाशोपयोगितंडुलनिष्पत्त्यनुकूलवैतुष्यकार्यायावहननवत्कदाचिन्नखविदलनमपि प्राप्नुयादिति
तस्मिन्पक्षेऽवहननस्याप्राप्तभावात्कार्यानुपपत्तेरवहननस्य पाक्षिकप्राप्तिः स्यात्तत्रास्मिन्विधौ अवहननेनैव वैतुष्यं कार्यमिति नियम
म्यते न नखविदलनेन सर्वात्मना निवर्तत इति नियमविधिरयमन्न च वैतुष्यस्य नखविदलनेनापि संभवादवहननं नियमो व्यर्थः प्रयोजनाभावादि
ति वाच्यं अवघातेनैव वैतुष्यकरणे किंचिददृष्टं जन्यत इति नियमादृष्टांगीकारात् नियमेन दृष्टकार्यालाभेप्यदृष्टस्योत्पत्तेः न त्वपूर्वं यागोत्पत्त्य
पूर्वद्वारा फलायैवोपयुज्यते तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यते इति कल्पनान्नियमापूर्वस्यानैवेयर्थ्यं एवं व्रीहिसोमादिनियम
विधिषु वोध्यं द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः परिसंख्याविधिः यथा चयनप्रकरणे इमामगृभ्णन्रशनामृतस्येत्यश्वा
भिधानीमादत्त इत्यश्वरशनाग्रहणलिंगत्वेन मंत्रविधिः एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मंत्रो रशनादानप्रकाशनसामर्थ्यरूपाल्लिंगा
दश्वरशनादानवद्गर्दभरशनादानेपि नियमेन प्राप्नुयात् तस्मिन्विधौ अनेन मंत्रेण अश्वरशनामेवादादीत न तु गर्दभरशनामित्यनुक्तौ
मेव ग्राह्येति गर्दभरशनायां मंत्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलकत्वादयं परिसंख्याविधिः पूर्वं दर्शपूर्णमासांगत्वं
प्रयाजादीनामुक्तं तत्रांगत्वबोधकप्रमाणं निरूप्यते श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याभेदेन षट् तत्र दध्ना जुहुयादित्यत्राग्निहोत्रवाक्यप्राप्तं
होमं जुहुयादित्यनेनोद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दध्नोऽङ्गत्वं लिंगं नाम सामर्थ्यं तच्च द्विविधं सर्वगतं पाद
गतं चेति सर्वगतं यथा स्रुवेणावद्यतीत्यवदानसामान्यशेषत्वेनावगमेपि स्रुवस्य सामर्थ्यरूपाल्लिंगादाज्यसांनाय्यादिद्रवद्रव्यस्यावदानविशेषांगत्वं स्रुवेण

पुरोडाशाद्यवदानस्य कर्तुमशक्यत्वात् पादगतं तु लिंगं सामर्थ्यं प्रकाशनसामर्थ्यं यथा अग्नये जुष्टं निर्वपामीति मंत्रस्य निर्वापप्रकाशनसामर्थ्य॰
पा लिंगान्निर्वापांगत्वं यस्य मंत्रस्य यत्प्रकाशनसामर्थ्यं तत्स्य तदंगत्वं पदांतरसमभिव्याहारो वाक्यं यथा इषेत्वेति छिनत्तीति अत्र छेदनांगत्वेन
इषेत्वेति मंत्रो वाक्येन विधीयते यद्वा अग्नये जुष्टमित्यत्रैव अग्नये जुष्टमित्यादिपदानां निर्वपामीत्यनेनैकवाक्यतापन्नत्वान्निर्वापांगत्वं प्रकरणं वाक्य
नाम परस्पराकांक्षा यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति अत्र दर्शपूर्णमासाभ्यां स्वर्गं पूर्वं कुर्यादित्युक्ते भवत्याकांक्षा कथमाभ्यां स्वर्गं
पूर्वं कर्तव्यमिति तथा फलवदाग्नेयादिसंन्निधौ समिधो यजति तनूनपातं यजति स्वाहामग्नौ यजतीत्यादिभिः प्रयाजादयः फलरहिताः श्रुता
स्तेषां स्ववाक्ये फलाश्रवणात् भवति प्रयोजनाकांक्षा किमेभिः प्रयोजनमिति ततश्च प्रयाजादीनां प्रयोजनकांक्षायां दर्शपूर्णमासयोः
कथंभावाकांक्षायां परस्पराकांक्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपूर्णमासांगत्वं निश्चीयते स्थानं नाम सन्निधिः यथा शुन्ध
ध्य पात्रसन्निधौ शुंधध्वमिति मंत्रस्य पाठात् सन्निधानात् पात्रप्रोक्षणांगत्वं समाख्यानं तु यथा अध्वर्युकाण्डप्रतिपादितेन कर्मजातेन आ
ध्वर्यवसमाख्यावशादध्वर्योः कर्तृत्वेनांगत्वं तथा ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इत्यादि याज्याकाण्डसमाख्याने तु ऐन्द्रा
ग्नादियागे याज्याकाण्डे याज्यानुवाक्याकाण्डसमाख्यावशात् आ इन्द्राग्नी इत्यादीनां याज्यानुवाक्यात्वेन विनियोगः विनियोगो नामांगत्वेनान्व
यः श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य बलवत्त्वं उत्तरोत्तरस्य दौर्बल्यं यथा कदाचनस्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यग्निहोत्र
प्रकरणे श्रूयते अत्र मंत्रस्य इंद्रप्रकाशनसामर्थ्यरूपात् लिंगात् इंद्रोपस्थानांगत्वे प्राप्ते ऐन्द्र्येति तृतीयाश्रुत्या गार्हपत्यमिति द्वितीयाश्रुत्या
च गार्हपत्योपस्थानांगत्वेन विधानात् लैंगिक इंद्रोपस्थाने विनियोगो बाध्यते श्रुतिर्हि स्वतो विनियोजिका लिंगं तु इंद्रप्रकाशनसामर्थ्यमा

लोचयेदिमुपातिष्ठत इति श्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यम् न चात्र न संभवति पञ्चश्रुतिविनियोगो नास्ति अग्नये जुष्टं नि
र्वपामीत्यादौ तत्र मंत्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्य अनेन मंत्रेण निर्वापं कुर्यादिति श्रुतिकल्पनाद्वारा लिंगं विनियोजकं भवत्येव श्रुतिक
ल्पनाप्रतिबंधकाभावात् तथा स्योनं ते सदनं कृणोमि तस्मिन्सीदेत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षत्वात् एकवाक्यत्वमानाद्वाक्यप्र
माणेन द्वयोरेकमंत्रत्वं भाति लिंगेन भिन्नमंत्रत्वं भाति आद्यस्य सदनप्रकाशनसामर्थ्यात् तस्मिन्सीदेत्यस्य सादनप्रकाशकत्वात् तत्र वाक्या
पेक्षया लिंगस्य प्राबल्याद्द्वाभ्यां वाक्याभ्यां लिंगेन स्योनं ते इत्यस्य सदनांगत्वं तस्मिन्सीदेत्यस्य सादनांगत्वमिति निर्णयः स्योनं ते इत्यस्य तस्मिन्
सीदेत्यनेनैकवाक्यत्वे लाघवादेकं चेत्सादनसामर्थ्यरूपलिंगं कल्पयित्वा अनेन विशिष्टमंत्रेण सादनं कुर्यादिति श्रुतिः कल्पनीया सद
नप्रकाशनरूपशक्तस्तु लिंगेन कल्पितया स्योनं ते इत्यनेन मंत्रेण सदनं कुर्यादिति श्रुत्या स्योनं ते इत्यस्य शीघ्रं सदने विनियोगे संजाते नैव मं
त्रस्यैकवाक्यतया द्वाभ्यां प्रमाणाभ्यां लिंगं कल्पयित्वा श्रुतिकल्पनाशक्तिर्विलंबितत्वादिति लिंगेन वाक्यस्य बाधः एवं वाक्येन प्रकरण
स्य प्रकरणेन क्रमस्य क्रमेण समाख्याया बाधो वेदितव्यः न चाश्रुत्या वाक्यादेरपि बाधः तदेवमंगताबोधकप्रमाणानि श्रुत्यादीनि निरूपिता
नि तत्त्वांगत्वं शेषत्वं पारार्थ्यमिति यावत् परोद्देशेन प्रवृत्ततत्कृतिव्याप्यत्वं पारार्थ्यं प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तपुरुषकृतिव्याप्य
त्वाल्लक्षणसंगतिः दर्शादेः प्रयाजाद्युद्देश्यप्रवृत्तकृतिव्याप्यत्वाभावान्नातिव्याप्तिः केवलप्रयाजानुद्देश्यकस्य विदुषः पुरुषस्याप्रवृत्तेः
तानि चांगानि द्विविधानि सन्निपत्योपकारकाणि आरादुपकारकाणि चेति यान्यंगानि साक्षात्परंपरया वा प्रधानयागशरीरं निष्पाद्य तदु
त्पत्त्यपूर्वोपयोगीनि तानि सन्निपत्योपकारकाणि यथावघातादीनि संपूर्णावहननप्रोक्षणादीनि अग्न्यादिदेवतानां तत्संयुक्तयाज्यानुवाक्या

४ वचनादीनि चश्रवणोत्तरणे देश्रीहिंगतानि पापहाय श्रवदननादे तु वृत्तिसेकादिरूपहेत्वद्वाराश्रीसादीनां पिहद्वारायुग्रोउशानित्यादके
त्वंन द्वाराया गप्राशीरतदुग्धम पूर्वहेतुत्वं च पाउस्यानुपाकार्देवता संस्कारद्वारा देवताया श्वत्वद्वारा गप्राशीरनि वैनैकत्वंन हृदयात दुग्ध
स्य पूर्वो पयोगित्वं च यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात् द्रव्यदेवते द्वियागस्वरूपा सिशिष्टेत्वात् स्वरूपे तन्मेव स्वामवायिकानां तु च्यं
नेश्रापालमनवेना पूर्वजनकाभ्यारादुपकारका गिपत्याप्रयाजाज्याभागानुयाजादीनि एतानि द्रव्यगतं देवतागतं वा संस्कारं जनयं
तिकिं त्वात्मगतमदृष्टं जनयंतीत्यारादुपकारका गित्युच्यन्ते सामान्यतः कर्मद्विविधं अर्थकर्म गुणकर्म चेति तत्रात्मगतापूर्वजन
कं कर्मार्थकर्म प्रयाजादिर्दर्शपूर्णमासप्रयाजादिकं गुणकर्म संस्कारजनकं तच्च द्विविधं उपयुक्तसंस्कारकं उपयोक्ष्यमाण
संस्कारकं च तत्रोपयुक्तसंस्कारकं प्रतिपत्तिकर्म उपयुक्तस्य आश्वाकीर्णकारस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिः रिति लक्षण
त्वयथा ऊडामत्तणकृष्णविषाणप्रासनं चत्वालहोमादिकं नान्विडामत्तणमपुपानपागोपयुक्तानीणंकरणं हशद्रव्यप्रक्षेपांकतात
प्रतिपत्तिलंपूर्व होमस्यतुपागोपयुक्तद्रव्यसंस्कारत्वाभावात् तद्रव्यप्रतिपत्तित्वं होमयागसमानकालीनमेनहोमसंस्कारस्यचानुववनादेक
उपयुक्तत्वाभावादितिचेदहुउपयुक्तसंस्कारमात्रं प्रतिपत्तिः नतु प्रधानयागोपयुक्तत्वमेवपाक्षतिपक्षोः विशसनानंतरवपाहदयाद्युद्धरणका
लवर्तमानस्यलोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसंगात् यागोपयुक्तद्रव्य प्रदेशरूपत्वाभावात्तथाकृष्णविषाणप्रासनस्यप्रतिपत्तित्वे
नसान्तपागांगभूतकंडूयनोपयुक्तत्वेपियागोपयुक्तत्वाभावात् अतो यवकरणमात्रेणविवक्षितं उपयोगमात्रं विवक्षितं तत्रापिवपाह
दयाद्युद्धरणोपयुक्तपशोः संबंधिनः शकृल्लोहितस्या ग्निविकरणस्यपाते तथेतानां एवंदृष्टांतकृष्णविषुयोगो होमस्यले प्रतिनियाणि

प्रतिपत्तिर्द्विधा प्रधानोत्तरकाला प्रधानसमकाला प्रधानपूर्वकाला चेति तत्राद्या इडाभक्षणादिका द्वितीया होमादिका तत्र यागादि दर्शपूर्णमा
सप्रकरणे श्रूयते सकृदुपस्तृणाति द्विर्हविषोवद्यति सकृदभिघारयति चतुरवत्तं जुहोतीति तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्य
न्तसाधनत्वेन न विधीयते होमस्याप्राप्तत्वेनानुवादासंभवात् न च यदाग्नेय इति वाक्याद्धोमप्राप्तिः तद्वाक्यस्य यागविधायकत्वात् न च यागहो
मयोरभेद इति वाच्यं देवतोद्देशेन द्रव्यत्यागस्य यागशब्दार्थत्वात् प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात् न त्राग्नेयचोदनया यागस्य प्राप्त
त्वेपि प्रक्षेपांशस्याप्राप्तत्वेनानुवादासंभवात् किं तूपस्तरणद्विरवदानाभिघारणावदानैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहो
तीत्यनेन विधीयते स च संस्कारः प्रतिपत्तिरूप एव अग्नये जुष्टमभिघारयामीत्यादिनिर्देशो यागगतमस्तात् अग्न्यादिदेवतार्थेन यावयवाकथं
संवदा च्चिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षयातद्वयवच्छेदावदानं कर्मैकप्रक्षेपस्य प्रतिपत्तिकर्मत्वौचित्यात् स च संस्कारः प्रधानसमकालः कर्म
होमो हि वषट्कृते जुहोतीति विधानात् वषट्कारेण चरणे अध्वर्युणा कर्तव्यः यागोपि तस्मिन्नेव क्षणे यागस्य स्मरणार्थत्वेन वषट्कारे
ण स्मारितः स यजमाने नानुष्ठेय इति तयोर्यौगपद्यसंभवात् तदिदं सर्वं प्रधानाधिकरणवार्त्तिके स्थितं प्रधानपूर्वकाला प्रतिपत्तिः
यथा शाखां संविध्यति लोहितं निरस्यतीति शाखासंवेधनलोहितनिरसने इदमपि पशावनालम्भाल्लोहितनशाखेतारकत्वं नवमि
धिकरणे स्थितं उपयोक्ष्यमाणसंस्कारोप्यनेकविधः साक्षाद्विनियुक्तसंस्कारः साक्षाद्विनियुक्तस्य पदुपकारकेण संस्कारः विनियो
क्ष्यमाणसंस्कारश्चेति तत्राद्यो यथा व्रीहीन् अवहन्तीत्यादिः व्रीहिभिर्यजेतेति वाक्याद्विनियुक्तव्रीहीणां अवहननसंस्कारः द्वितीयो य
था वत्समालभेतेति दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोदुहस्योपकारको योवत्सस्तत्संस्कारकमिदमालम्भनं तृतीयो यथा तन्नेपपासिद्धा

नयतीति सर्वेभ्यो देव्याभिदेवतिवाकेनन च्छेदेन निर्दिष्टत्वेनैव देवयागांगत्वेनाति नियोज्यमाज्यं प्रयत्नात् संस्कारकत्वाद्धि नियोज्यमानं सं
स्कारकं दध्यानयनं वत्सपुरोडाशयागस्य तत्प्रयुक्तो पयोस्समानं देवता संस्कारार्थः यागांगो अदृष्टार्थस्य अज्ञाने संस्कार्यं श्रीयोमदेवताप
वक्रयागे उपयुक्ता न्यान हृदयाद्यंगयागे च पयोदसमानत्वात् ... यागोद्देशे देवताये चोपयुक्तं संस्कार्यः यागांगो अदृ
ष्टार्थस्य तत्त्वाकसाधनपरिमाणमपि न पेव उ नमस्यायां समानं देवता संस्कारत्वान्नदो उपयोस्समानं संस्कारः ... नरो अदृ
ष्टार्थः हृदयादेरुन्नियागा पूर्वं ... पमाणे वसाहोमा ... तीपाने ... अदृष्टार्थं उत्पादूसंके चित्तु उपयोस्समानसंस्का
रश्च संस्कारकर्मत्वं प्रतिपत्तिकर्मत्वं च तुल्यं न द्रव्यसंस्कारेण नभस्यामानत्वात् उपयोस्समानत्वाभावान्न द्विगुणत्वे दोष इतीति
लक्षणसंगतिः अत्रायं विशेषः अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यं कर्मणि द्रव्यस्य गुणत्वं यथा अग्निहोत्रं जुहोति दध्नादे गुणत्वं
गुणकर्मणि तु द्रव्यस्य प्राधान्यं कर्मणो गुणत्वं व्रीहीन्प्रोक्षति अवहन्तीत्यादौ द्वितीयया व्रीहीणां कर्मत्वप्राधान्यप्रतीतेः क्रियापदस्य
द्रव्यस्य प्राधान्यं प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वं ... गुणकर्मत्वं तु विधेः उत्पादि विकृति संस्कृति भेदान्नत्रो यातिसंस्का
सं८ रोपयोगः व्रीहीनामवधातेन वैतुष्यादि संभारे पुनर्विधानिवेशः आहवनीयादयः उत्पत्तिरेव आहवनीयादेरुत्पत्तिहेतुः न संस्कारजनक
तादापानं सोमाभिसंस्कारत्वं नापि संस्कारो पयत्वाधानेन ... अध्ययनेन त्वाधानाय स्वाध्याप्त ... नापि संस्कारो पविता नि
र्थ पयात्रीहीन वहन्तीति अत्र व्रीहि गतवैतुष्यस्यादिकृतिजनकत्वादवहननं विकृति संस्कारकं संस्कारतियपा व्रीहीन्प्रोक्षतीति अत्र प्रो
क्षणस्य व्रीहिगतातिशयः संस्कृतिजनकत्वा संस्कृतिरूपगुणकर्मत्वं अत्र प्राधान्यमध्ययनेच स्वत्वं च गुणकर्मन तु नो त्वं गप्रोक्षण

दिकं सर्वं कालं गंगागुणकोऽस्तीति ध्येयं स्वर्गकर्माऽपि त्रिविधं नित्यनैमित्तिककाम्यभेदात् तत्र यावज्जीवमग्निहोत्रं जुहोतीत्यादिनित्यं जु
होतीति शान्तर्जुहोतीति जीवनापुरुषेण साध्यं प्रातःसायंयोः नियमेन कर्मत्वतया श्रवणात् अग्निहोत्रादिकं नित्यं स्वगृहे दाहे घल
नेपुरोडाशमष्टाकपालं निर्वपेदिति दर्शपूर्णमासादि पत्नीनिमित्तकं प्रायश्चित्तादिकं नैमित्तिकं नित्यनैमित्तिकयोरकरणे
प्रत्यवाय एव केवलं न फलं नास्तीति केचित् तन्न नित्यानुष्ठानजन्यवृत्तेः फलस्य नित्यनैमित्तिकयोरेव कुर्वाणो दुरितक्षयं स्वर्गादिवा
के: प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात् न चैवं तयोरपि काम्यत्वापत्तिः फलवत्त्वादिति वाच्यं फलकामनापूर्वकस्य
नुष्ठानाभावात् तन्नादिविधाको फलकाममुद्दिश्य तदर्थफलसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तेः काम्यमपि कर्म
द्विविधं केवलमैहिकफलकं आमुष्मिकफलकं ऐहिकामुष्मिकफलकं चेति तत्राद्यं यथा कारीर्यादि तत्र ह्यमयवर्त्ति मुख्यता
स्य संजीवनहेतुर्वृष्टिकामिनाऽऽत्मनोऽपनेन कालान्तरभावि वृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा केवलामुष्मिकफलकं यथा
स्वर्गाद्यर्थं दर्शपूर्णमासादिकं स्वर्गस्य इहलोकभोग्यत्वाभावात् ऐहिकामुष्मिकसाधारणफलकं यथा वायव्यं श्वेतमालभेत भू
तिकाम इति भूत्यादिफलकं भिन्नमन्यत्र विस्तरः ननु दर्शपूर्णमासादिकर्मणां ब्रीह्यादिद्रव्याणां च प्रत्यक्षत्वेन लौकिकत्वात्
वेदस्यालौकिकार्थ [illegible] बोधकत्वमिति चेन्न कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनतया कर्मकर्तव्यताबोधकस्य
वेदस्यालौकिकार्थबोधकत्वात् एवं ब्रीह्यादीनां यागादिक्रियासाधनत्वेन प्रत्यक्षत्वेऽपि तद्बोधकस्यापि वेदवाक्यस्या
लौकिकार्थबोधकत्वमिति न दोषः इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते तत्र स्वर्गकामो यजेतेत्यत्र यजिधातोरु
परि तेन प्रत्ययेन धर्मद्वयमस्ति आख्यातत्वं लिङ्त्वं चेति तत्राख्यातत्वं च सर्वलकारसाधारणं तदवच्छेदेन लिङः प्रत्ययः पुरु

स्य प्रवृत्तिरूपामर्थभावनां श्रुतिः प्रतिपादयति शाब्दार्थभावना किं केन कथमिति अंशत्रयविशिष्टा तत्राद्यविधिजेन तत्र प्रथमांशसमपेक्षभाव
येदिति प्रतीयते सुवर्णनाभिहिता नाम्नैवेषां कारकाणां लिङ्‌तार्थक्रियान्वयनियमेसति लिङ्‌नार्थस्य प्राधान्यात् तत्र शब्दस्य प्राधान्य
पाख्यस्यार्थस्य प्राधान्यात् प्रथमांशस्यापार्थभावनाया उपस्थितिर्युक्ता ततः करोतिसमानार्थकभावयतेः सकर्मकत्वात् किं भावयेदि
ति कर्माकांक्षायां भिन्नपदोपात्तोपि स्वर्गो भाव्यत्वेनान्वेति कथं तेनेत्यर्थः साध्यत्वेनेति पावनत्वेनानुसमानपदोपात्तोपि यागो भाव्यत्वे
नान्वेति दुःखासंभिन्नसुखस्य स्वर्गस्य पुरुषार्थत्वेन कर्मत्वायोग्यत्वात् स्वर्गस्य नानर्थत्वात् स्वर्गमेव भावकत्वेन कुप्तिन तमन्तपाकर्मत्वेनान्वयोग्यता
न तत स्वर्गं भावयेदिति केनेत्यपेक्षायां ततः केनेति करणाकांक्षायां समानपदोपात्तोपि यागः कारणत्वेनान्वेति यागेन स्वर्गं कुर्यादिति
ततः कथं यागेन स्वर्गं कुर्यादिति कथंभावाकांक्षायां प्रधानाधानावहननादिजन्यप्रकारेण प्रयाजादिजन्येनादृष्टोपकारेण
सहितेन यागेन स्वर्गं कुर्यादिति प्रधानाधानप्रयाजादिकमङ्गजातमितिकर्तव्यतयान्वेति कथंभावाकांक्षा पूरकत्वमितिकर्तव्यता
त्वं यथौदनकामः पचेदित्यत्र लिङा भावना प्रतीयते किं भावयेदित्याकांक्षायामोदनो भाव्यत्वेनान्वेति केनेत्याकांक्षायां पाकेनेति
भाव्ये कथमित्याकांक्षायां तण्डुलकारणत्वे तेनेति तत्र तण्डुलप्रकारः समिधुत्थेन पाकेनेति जः संयोगेन ओदनं भावयेदिति वाक्यार्थः
संपद्यते तद्धि देवदत्तेन बोध्यः सप्रत्ययलिङ्‌प्रत्ययो लिङ्‌तावच्छेदेन शब्दभावना प्रत्ययप्रत्यासन्ने लोके प्रयोगमानयेत्या वाक्यार्थ
वत्त्वेन तत्र संप्रयमाणाकार्यं गवानयनेन प्रवर्तत इति प्रेरणात्मा व्यापारः सोपि च शिष्योगवानयनेप्रवर्ततेऽपन्नयवतिरेकाभ्यां प्रेरणा
ज्ञानं प्रवृत्तिकारणं प्रेरणाज्ञानस्य वाक्यत्वानिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणावाचकत्वं लोके प्र
सिद्धं वेदेपि तेनैव शक्तिग्रहात् पश्चात्तदर्थस्तु विशेषः लोके गवानयनादिशब्दानुकूलप्रेरणाव्यापारः प्रयोजकस्य गमना ६

ककर्मविशेषः वेदे तु प्रयोक्तृपुरुषाभावात् लिङादिशब्दनिष्ठ एव सः अंगीक्रियते अत एव शब्दनिष्ठव्यापारत्वात् शाब्दीभावनेत्युच्यते
यागहोमादिविषयकप्रवृत्तिहेतुत्वात् प्रवर्तनाप्रेरणेति चोच्यते सैषा शाब्दभावनापि अंशत्रयविशिष्टा तत्र पुरुषप्रवृत्तिरूपार्थभावनाभा
व्यत्वेनान्वेति अध्ययनावगतलिङादिकं करणत्वेनान्वेति अर्थवादश्रुतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेतीति न सां
गवेदाध्येतारोधीतव्याकरणा निगमनिरुक्तादिवशात् प्रतिपन्नः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्य
ज्ञानसचिवैर्यागाद्यर्थस्य कर्तव्यत्वं ... बुध्वा यागादीननुतिष्ठन्तीति शाब्दभावनाबोधः अनुष्ठानं कुर्युरित्यर्थः अनुष्ठाने प्रवृत्तिः तेन पुरुष
प्रवृत्तेः शाब्दभावनाभाव्यत्वमस्ति इयं च शाब्दभावना ज्योतिष्टोमादिश्रुतिलिङ्गवाक्येषु स्वरूपेण प्रतीयमानापि कर्तव्यत्वेन न प्रती
यते अर्थभावनाया एव तेषु कर्तव्यत्वावगमात् किंतु स्वाध्यायोध्येतव्य इति वाक्ये एव कर्तव्यत्वेन प्रतीयते न चात्रार्थभावनाया
एव विधेयत्वमिति वाच्यं स्वाध्यायोध्येतव्य इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्य शब्दभावनारूपत्वात् तथाहि
अधिपूर्वकादिङ् अध्ययने इति धातोः कर्मणि तव्यप्रत्ययो विहितः कर्म च स्वाध्यायः प्रधानेन संस्कारमध्ययनं गुणकर्म ब्रीहिसंस्कार
कोत्तरणादिवत् अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकांक्षायां स्वाध्यायगततत्तल्लिङादिविशिष्टवाक्यसाम
र्थ्यलभ्यं यदनुष्ठानोप... यिकयागादिरूपार्थज्ञानं तदेव दृष्टत्वात् कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकपुरुषार्थसाधनत्वाच्च प्र
योजनं कर्मावबोधं विना कर्मानुष्ठानायोगात् न तद्दृष्टप्रयोजने दृष्टफले संभवत्यदृष्टफलकल्पनायोगात् तथा च स्वाध्यायविधिने
व स्वाध्यायगतविधिवाक्यगतलिङादिशब्दनिष्ठाः सर्वाः शाब्दभावनाः अंशत्रयविशिष्टाः कर्तव्यत्वेन विधीयन्ते सांगवेदाध्ययनेन मु

यन्नाः पुरुषाः स्वाध्यायेन गृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यस्वर्गसाधनैः फलवद्यागादिकर्मभिरनां बुध्यायागादीन
नुतिष्ठेयुरिति अनुतिष्ठेयुरिति प्रवृत्तिं कुर्युरित्यर्थः तत्र पुरुषप्रवृत्तेर्भावनेनान्वयात् अध्ययनावगतलिङादेः करणत्वेनान्वयात् प्रा
शस्त्यज्ञानस्येतिकर्तव्यतात्वेनान्वयात् शाब्दभावनाया अपि अंशत्रयवैशिष्ट्यं अर्थभावनायां स्वर्गादि हि तत्र समीहितं स्वर्गादिभावक
त्वभानमपि लिङादिवशादेव प्रवर्तनापरपर्यायविधिः यागादेः पुरुषार्थत्वं इत्यज्ञानेन तत्र पुरुषं प्रवर्तयितुं न शक्नोतीति स्वभाव्यपुरुषप्रवृत्ति
विषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमाक्षिपतीति अन्यथा तस्य प्रवर्तनात्वमेव न स्यात् प्रवृत्तिहेतुव्यापारस्यैव प्रव
र्तनात्वात् लिङादिस्थले तु प्रवर्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति भावनात्वं नाम भवितुः प्रयोज
कव्यापारत्वं तत्रार्थभावनायां भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वाल्लक्षणसंगतिः शाब्दभावनायामपि पुरुषप्रवृत्तिरू
पस्य भवितुः प्रयोजकव्यापारत्वाल्लक्षणसंगतिः ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टो
मपदस्यैकपदमन्वयानुपपत्तिश्चेत् भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात् ज्योतिष्टोमनामकेन यागेनेति कथं तन्नामत्वमि
ति चेत् ज्योतिरात्याख्या त्रिवृदादिस्तोमा अस्मिन् सन्तीति व्युत्पत्त्या यागनामत्वात् यागस्य त्रिवृदादिस्तोमसंबन्धः केनावगम्यत इति चेत् त्रि
वृत्पंचदश सप्तदश एकविंशस्तोमा भवन्तीति वाक्यान्तरेण ज्ञायते ... शास्त्रे नैव लक्षणा ज्योतिरादिभिरर्थस्तु भिन्नस्तन्नाम
त्वं बोध्यं शास्त्रे हि तत्प्रख्यं चान्यशास्त्रं तद्व्यपदेशश्चेति कर्मणां नामधेयत्वे निमित्तमुक्तं तत्प्रतिपादितेन तथा हि अग्निहोत्रं जुहोतीत्यत्र अग्निहोत्रशब्देनाग्नि
देवतारूपो गुणो न विधीयते अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मन्त्रं जुहोतीति वाक्यादिविहितेन मन्त्रवर्णेन देवतायाः प्राप्तत्वात् किं त्वग्निप्रख्यापकं यद्यग्नि

प्रापकंप्रच्च . स्त्वांन अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेत्यादिकंतेनप्राप्तमग्निसंबंधंनिमित्तीकृत्यअग्नयेयद्धोत्रंहोमोऽस्मिन्नितिबहुव्रीहिणाअग्निहोत्रप
दस्यहोमनामधेयत्वेनचहोमस्यप्रत्ययवाच्यायांपक्षभावनायांकरणत्वात्नामत्वेअग्निहोत्रेणेतितृतीयास्यात्ज्योतिष्टोमेनेतिवदितिवाच्यंद्वि
तीययाप्येवंलक्षणयाकरणार्थकत्वात्नासाधितंकरणमितिन्यायेनासाधितस्यकरणत्वायोगात्अर्थप्राप्तहोमगतसाध्यत्वानुवा
दकत्वेनवाद्वितीयोपपत्तेरितितत्प्रख्यन्यायेनात्रनामत्वंतथाश्येनेनाभिचरन्यजेतेत्यत्रश्येनपदंयागनामधेयंनतुयागांगत्वेनश्येनपक्षि
रूपगुणविधिःयथावैश्येनोनिपत्यादत्तेएवमेवायंद्विषन्तंभ्रातृव्यंनिपत्यादत्तइत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसंगात्श्ये
नपक्षीयथापक्ष्यन्तरंनिपत्यादत्तएवमेवायमपिश्येननामकःकर्मविशेषोभ्रातृव्यंशत्रुंनिपत्यादत्तइतिव्यपदेशःकर्मनामत्वपक्षेयुज्यते
र्यागांगत्वपक्षेनपक्षिविधौत्वपक्षेनैवोपमानोपमेयभावःस्यात्सचायुक्तःतस्मात्श्येनतुल्यताव्यपदेशात्श्येनपदंनामधेयंतननन्वभि
भिचरन्शत्रुवधकामःश्येननामकेनयागेनाभिचारंभावयेदितिवाक्यार्थःनन्वेवमप्यभिचारस्यापिवेदोक्तत्वात्अभिचारादेःकर्म
णास्तिकानामपिप्रवृत्तिःस्यादितिचेन्नवेदोक्तोऽप्यभिचारोवेदविहितोनभवतिफलत्वात्फलंनविधेयंकिंतुफलमुद्दिश्यतत्साधनत्वे
नकर्मैवविधेयमितिसिद्धान्तात्अतोऽभिचारस्याविहितत्वेनप्रत्यवायजनकत्वात्एवमुद्भिदायजेतपशुकामइत्यत्रपशुरूपफलायावि
धित्सितस्ययागस्यउद्भित्पदंनामधेयंनतुयथाकथंचित्प्राप्तयागमुद्दिश्यतदंगत्वेनोद्भिद्रूपगुणविधिःखनित्रादिवदुद्भिन्नामकस्यगुणस्याप्र
सिद्धत्वात्यागेतदुद्भिद्यतेफलमनेनेतियोगवचनत्वसंभवात्यागनामत्वेननन्वुद्भिद्यतेऽभितोऽनेनेतियोगवशेनखनित्रादावप्युद्भिदःप्रयो
गसंभवात्खनित्रादिगुणविधिःकिंनस्यादितिचेन्नएतादृशस्थलेगुणविधिःक्वापिवक्तुंनशक्यतेविरुद्धत्रिकद्वयसमावेशात्व्याप्तेर्दाशश्वसंगणन्

तथा हि उद्भिदा यजेत पशुकाम इत्यत्र मानांतरेणाप्राप्तस्य यागस्यानुवादासंभवात् पशुकर्मकभावनायां करणत्वेन यागो विधेयः यागेन प-
शून् भावयेदिति न तस्य यागस्य विधेयत्वं फलं प्रति शेषत्वं तया प्रतीयमानं मानं गुणत्वं शेषत्वं तत्र स्यांगत्वे यदर्थः फलसिद्ध्यर्थं पुंसानुष्ठी-
यमानत्वादुपादेयत्वमिति विधेयत्वगुणत्वोपादेयत्वात्मकमेकं त्रिकं यागे स्थितं तथा यागोद्देशेनोद्भिद्गुणविधौ विधित्सितगुणोपेतयागस्य प्रा-
धान्यमुद्देश्यत्वमनुवाद्यत्वं चेति द्वितीयं त्रिकं तदिदं त्रिकद्वयं परस्परविरुद्धमेकस्मिन् यागे प्रसज्येत अतो न गुणविधिः न च सोमेन यजेतेत्यत्र स ३
विरुद्धत्रिकादिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणामंगीकृत्य सोमवता यागेनेष्टं भावयेदिति सोमविशिष्टयागविधानाद्य पासो-
मरूपगुणविधिः तद्वदुद्भिन्मदस्यापि मत्वर्थलक्षणया उद्भिद्गुणविशिष्टयागविधिरस्त्विति वाच्यं सोमादौ गत्यंतराभावान्मत्वर्थलक्षण-
या विशिष्टविध्यंगीकारः उद्भिदादौ नामत्वेन गतिसंभवाद्विशिष्टविध्यंगीकारायोगात् तस्माद्योगबलादुद्भिदादीनां नामत्वं तथा चित्रया य-
जेत पशुकाम इत्यत्र चित्रापदं प्राजापत्यनामधेयं दधिमधुघृतमापो धानास्तंडुलास्तत्संसृष्टं प्राजापत्यमित्यत्र तत्संसृष्टं प्राजापत्यमिति सा-
मानाधिकरण्याद्दध्यादिद्रव्यकस्य प्रजापतिदेवतासंबंधः श्रुतः तेनानुमितो यागो विधीयते विहितस्य यागस्य फलाकांक्षायां चित्रया धी
यजेतेति वाक्यं फलसंबंधविधायकं तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वाच्चित्रापदं नामधे-
यं न त्वग्नीषोमीयं पशुमालभेतेति वाक्यप्राप्तपशुयागं यजेतेत्यनूद्य चित्रत्वस्त्रीत्वगुणद्वयविधानं समानं तत्र प्राप्तं कर्मोद्दिश्य तत्रानेकगु-
णविधाने वाक्यभेदापत्तेः तदुक्तं प्राप्ते कर्मणि नानेको विधातुं शक्यते गुण इति मानांतराप्राप्तकर्मत्वे त्वेकदेवताष्टकपालपुरोडाशमात्रा-
स्यादौल्मास्यादवेकगुणविशिष्टो द्रव्यदेवतासंबंधेनानुमितो यागो विधीयत इति सिद्धांतात् तदुक्तं अप्राप्ते तु विधीयंते बहवोऽप्येक-

यत्नत इति अथ यथा पशुना यजेतेत्यत्र मानान्तरप्राप्तं कर्मोद्देश्यगतं तथा पशुनेत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसंख्यानां त्र-
याणां वाक्यभेदं विनैव विधिरङ्गीकृतस्तद्वदत्राप्येकपदोपात्तचित्रत्वस्त्रीत्वविशेषितपशुद्रव्यकारकस्य विधानान्न वाक्यभेदः अतएव
त तत्र विधेयस्य पशोरुपादेयत्वात्तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमित्येकेनैव पशुना यष्टव्यं ग्रहं संमार्ष्टीत्यत्रोद्देश्यगतमेकत्वमविव-
क्षितमिति सिद्धान्तप्रवादः कथं ग्रहं संमार्ष्टीत्यत्र ग्रहमिति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्प्रयोजनवत्त्वाच्च प्राधान्येनावग-
म्यते संमार्गस्तु ग्रहं प्रति गुणभूतः प्रतिप्रधानं गुण आवर्तनीय इति न्यायाद्यावन्तो ग्रहास्तेषां सर्वेषां संमार्ग इति निश्चये सति कति ग्र-
हाः संमार्जनीया इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितं यद्युच्यते तेनेदमुद्देश्यगतं किंतु स्वविधेयं ग्रहे सं-
मृज्यत्वं संमृज्यत्वे चैकमिति न स्यात्तद्विधेयभेदाद्वाक्यभेदः स्यात् तथा बुभुत्साया अभावात् विधिनायोगाच्चोद्देश्यगतसं-
ख्या न विवक्षिता उद्देश्यगतमपि विशेषणं किंचिद्विवक्षितं यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति यथा तत्रैव
ग्रहत्वं विवक्षितं तद्विवक्षां विना उद्देश्यस्वरूपस्य ज्ञातुमशक्यत्वात् तेन ग्रहजातीयस्यैव न तु सोमयागोपकारीयत्वाच्चमसेषु न सं-
मार्ग इति स्थितं पशुना यजेतेत्यत्र यागं प्रति पशुर्विधेयत्वाद्गुणभूतः प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियता पशुना यागः कर्त-
व्य इत्याकाङ्क्षायामेकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितं बुभुत्सितत्वात् किंच लिङ्गसंख्याविशेषितस्य पशुद्रव्यरूप-
कारकस्यैकपदोपात्तस्य विधेयत्वाद्विधेयपशुद्वारा तद्गतलिङ्गसंख्यादेरपि क्रियाङ्गत्वादेकत्वं विवक्षितं अथवा तृतीयाभक्त्या ति
भिहितयोर्लिङ्गसंख्ययोर्विभक्त्याभिहितया करणकारकशक्त्यात्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण संबन्धमनादृत्य तद्देव

साक्षात्क्रियांगत्वेनाविधाने सति पश्चाद्रूपैकहायनीन्यायेन परस्परसमन्वयः यागांगत्वेनाभिहितो यः पशुः स एकः पुमांश्चेति यथा अरु-
णया पिंगाक्ष्यैकहायन्या गवा सोमं क्रीणातीत्यत्र कारकाणां क्रियान्वयनियमात् करणविभक्तिनिर्दिष्टरूपपिंगाक्षीत्वादीनां
न च तेषां परस्परमन्वितानामेव सोमक्रयणांगत्वेनान्वये सति आरुण्यादेर्गुणस्यामूर्तस्य स्वतः क्रयसाधनत्वायोगात् क्रयसाधनै-
कहायनीगोपरिच्छेदकत्वेन पश्चात्परस्परं पार्ष्णिकान्वयः यथा एकहायनी गौः सा पिंगाक्षी अरुणेति तद्वत् तदेवमुद्देश्यगतं विशे-
षणमविवक्षितं उपादेयगतं विवक्षितमिति स्थितं एवं च विज्ञापदेन विधत्त ज्योतिष्टोमविशेषितपशुकारककरूपपशुनेति पदान्-
दितो ज्योतिष्टोमीयपशुयागे विधानं तु शक्यत्वात् कथं नाम तु जीवेति चेन्न तत्त्वात् फलितस्य तस्य प्राप्यपशुयागस्य फलसंबंधाकांक्षा स्यान्नमग्-
कृतानां ज्योतिष्टोमीययागस्य फलाकांक्षा स्यात् तद्दृष्टमनुकृतं तस्मात् त्रिनापदं कर्मनामधेयं एवं तन्त्र्यायादिभिरन्यत्रेण सर्वकर्मनामतन्त्रस्तो
उत्पत्तिविधिवाक्यस्य प्रामाण्यं विचारितं अथ अर्थवादविचारः अर्थवादानां तु स्वार्थपरत्वे प्रयोजनाभावादध्ययनविधिविशेषेण फल-
वदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यं स च चतुर्विधः निंदाप्रशंसापरकृति-
पुराकल्पभेदात् तत्र निंदार्थवादो यथा अमस्त वा एतद्यदर्द्देहे अपशवो वा अन्ये यो बर्हिषि दद्यात् पुरास्य संवत्सराद्गृहे रुदन्तीति प्रशंसा
यथा शोभतेऽस्य मुखं य एवं वेद वायुर्वै क्षेपिष्ठा देवतेत्यादिः परेणोदं नानापुरुषैकर्मकृतमिति प्रतिपादको अर्थवादः परकृतिः यथा अग्निर्वा
अकामयतेत्यादिः परप्रवृत्तकार्यादिप्रतिपादकः पुराकल्पः यथा तानश्वपतिर्यादिया नाबध्नात्पुरेत्यादिः तत्र निंदार्थवादस्य विधेय-
न्यनिंदाद्वारा विधेयप्राशस्त्यपरत्वं अमृतमित्यादेः रजतनिंदाद्वारा विधेयमतरजतदानानिषेधप्राशस्त्यपरत्वे विरोधाभावात् तत्र यथा

णां सा दाः प्राशस्त्यपरत्वमेव नानुवीर्य्यसर्व्वकादर्सवाद्युः क्रियाभिनाद्यतिश्र एतस्तादेवता अन्नस्तैदेवत्यं कर्म्मप्रशस्तमिति विधेयदे
वता गतप्राशस्त्यप्रतिपादनद्वारा विधेयकवाक्यानां श्रुतिर्वा अश्वक्रामपतेपस्माग्निदेवत्यो यागः पूर्व्वकाले श्रुतिनाकेनतस्य
शस्तः प्राधिकारादिदानीं सविश्वस्यैर्यजमानेस्वपर्णकर्ता प्रामीति विधेयकर्म गतप्राशस्त्यद्वारा विधेयकवाक्यानामेवंसन्नपा
ठं कतिकार्य्यं तं श्रमपरितप प्राश्रन्तः पाकेनाउपदधाति विधानकारश्रुतिपुदेनद्वन्द्ववाक्यानां संप्रतीपनेनद्वइ वोकि मि
तिसंदेहे नेत्यर्थवत्वमीनर्थवादानप्रत्नमिति निश्चयोयतश्रुतितेवोवैयनामेतपदवादस्सर्व्वांदिग्ध्यापिनिर्णायकतेन प्रामाण्यं
द गीकारामंत्राणामप्यध्ययनविधिनाक्रतस्वाध्यायस्पफलवदर्थज्ञानापेक्षमेवनतनदृष्टार्थत्वं हेतुसंभवमदृष्टकल्पना
योगात् प्रयोगकालेकर्मज्ञानं विनाकर्मानुष्ठानायोगात्कर्म्मोपयिकमर्थज्ञानं मंत्रैः क्रियतेनचोपदेश्ववचनादिनाप
र्थस्मरणसंभवादनुष्ठानोपपत्तिरितिवाच्यंमंत्रैरेवार्थस्मरणानुष्ठानेस्मातिफलंभवतिनान्यथेतिनियमांगीकारा
नियमेनार्थ द इत्यर्थो कारा त्तदभावेतत्स्यादृष्टलोपेतत्फलंफलंनसिध्यतीतिकल्पनातनवेवं मंत्राणांस्वप्रकाशत्वे विनियोगश्रुतिफलिते
विनियोगोनामपेक्षितेनान्वयः शेषत्वं नामांगत्वं तत्तस्याश्रुमामगृभ्णानृरशनामिति मंत्रस्परशनाग्रहणेसामर्थ्या
मस्तीतिरशनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिंगादेवरशनाग्रहणांगत्वोपपत्तेः इमामगृभ्णानृरशनामित्तश्वस्याभि
धानीमादत्तश्रुतिवचनेकिमर्थमितिचेन्नपरिसंख्यार्थत्वाततचपनश्वकरशेऽश्वस्यरशनाग्रहणेगर्दभरशनाग्रहणं चेति
द्वयमस्तितत्रलिंगादश्वरशनायांमंत्रप्राप्तावुच्यमानायांलिंगाविशेषाद्गर्दभरशनायामपिमंत्रः प्राप्नुयात् श्रुतो
श्वरशनायामेवमंत्रः कार्य्यः नगर्दभरशनायामितिमंत्रनिवृत्तिरूपपरिसंख्यापर्य्यायोविधिः साचपरिसंख्यात्रिदोषा सा
10

मी·प·

१०

र्पित्यागः परार्थस्वीकारः प्राप्तबाधश्चेति तत्राश्वाभिधानीमादत्त इत्यत्र वाक्यादनेनमंत्रेणाश्वाभिधानादानं कुर्यादिति

स्वार्थः स च त्यक्तः गर्दभरशनायां मंत्रनिवृत्तिः परार्थः स च स्वीकृतः गर्दभरशनाया अपि लिंगात्प्राप्तस्य मंत्रस्यानेन वा

नरा पक्षेति द्वितीयपरिसंख्यागतं भावस्यांगीकृतत्वं गतत्वेनेति सावधित्वमेवमदुष्टोऽदुष्टविकल्पो व्यवतिकों गीकृ

तः यथा पदाज्ञो पाष्टाकपालः अष्टौ कपालेषु [illegible] नापिगाना नन्वगतः तत्रापूर्वविशेषस्य पुरोडाशस्य

प्रकृतिकृत्यांशानापाम नियमेन प्रसक्तस्याविद्यमानस्य प्राप्तौ [illegible] वैयजेतेति वाक्यादूर्ध्वपात्रियम्यते एवं पर्वैर्यजेतेति वा

क्यावधावाप्यनियम्यते तयोरेकार्थत्वात् विकल्पः एवं सति [illegible] दुरीनेन [illegible] अतिरात्रे षोडशी ग्रहो विहितः

नेष्यातिरात्रे षोडशिनं गृह्णातीति प्रतिषेधाद्ग्रहणाभावो विहितस्तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोरेक

स्मिन्प्रयोगेऽनुष्ठानुमशक्यत्वात् विप्रयोगे ग्रहणानुष्ठाने प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः स चा

ष्टदोषदुष्टः तथा हि पूर्वं ब्रीहिप्रयोगे यवशास्त्रस्य प्रतीतप्रामाण्यस्य परित्यागः अननुष्ठापकत्वलक्ष

णाप्रामाण्यस्वीकारः तेनैव प्रयोगे यवानुष्ठाने पूर्वं त्यक्तप्रामाण्यस्वीकारः स्वीकृतप्रामाण्यत्यागः इत्या

गः श्चेति यवशास्त्रे चत्वारो दोषाः एवं पूर्वं यवप्रयोगे ब्रीहिशास्त्रस्य प्रतीतप्रामाण्यस्य परित्यागः

अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः पुनर्ब्रीहिप्रयोगे ब्रीह्यनुष्ठाने ब्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः

स्वीकृतप्रामाण्यपरित्यागश्चेति ब्रीहिशास्त्रे चत्वारो दोषा इत्यष्टदोषदुष्टो विकल्पः स च विकल्पः क्वचिदेकार्थत्वादेक

१० ॥

कार्यकारित्वादित्यर्थः यथा व्रीह्यादौ तत्र व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनसमर्थत्वाद्विकल्पः क्वचिद्वचनबलात् यथा बृहत्पृष्ठं भवती
ति बृहत्साम सामसाध्यं पृष्ठनामकं स्तोत्रं विहितं रथंतरपृष्ठं भवतीति रथंतरसाम सामसाध्यं पृष्ठस्तोत्रं तत्र विधीयते स्तोत्रं प्रयाजादिवदपूर्वा
र्थत्वादर्थकर्म सामानुसंस्कारकर्मत्वाद्गुणकर्म स्तोत्रसाधनीभूतस्तोत्रीयाणामभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वात् गीयमाना
सु प्रगीतमंत्रसाध्यं इन्द्रादिगुणिनिष्ठगुणाभिधानं स्तोत्रं अप्रगीतमंत्रसाध्यं शस्त्रं अभिव्यक्तं गुणगुणिसंबन्धाभिधानमित्यर्थः अप्रगीतमंत्रसाध्यगुणि
निष्ठगुणाभिधानं शस्त्रं गानक्रियाविशेषः साम स्तोत्रसाधनीभूता ऋचः स्तोत्रीयाः तद्गतत्रिवृत्पंचदशत्वादिसंख्याविशेषः स्तोमः
स्तेषां भेदः तथा च बृहद्रथंतरपृष्ठयोर्भिन्नार्थत्वेन एककार्यत्वाभावेपि बृहत्पृष्ठं कार्यं रथंतरं वा पृष्ठं कार्यमिति वचनबलाद्व
विकल्पः क्वचिद्व्यवस्थितविकल्पः द्वितीयप्रयाजकर्मणि नाराशंसतनूनपान्मंत्रयोरेककार्यत्वाद्विकल्पः स च राजन्यवसिष्ठानां
नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति वाक्याद्व्यवस्थित इति व्यवस्थितविकल्पः तदेवं चोदनापर्यायाणां विधि
वाक्यानां मंत्रयद्विशिष्टभावनाविधायकत्वात्प्रामाण्यं उद्भिदादीनां नामतया ऽर्थवादानां विधेयप्राशस्त्यपरतया मंत्राणामनुष्ठे
त यार्थस्मारकतया प्रामाण्यमिति सकलस्य वेदस्यालौकिके धर्माधर्मादौ प्रामाण्यं स्थितं स्मृतयोपि मन्वादिप्रणीता वेदमूलकत्वा
त्स्वादृष्टकार्ये धर्मे तासां प्रामाण्यं औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धत्वात्सर्वे वेष्ट
नेसादिश्रुतौ स्पर्शनस्य कर्तुमशक्यत्वात् वैसर्जनीयहोमीयं वासोऽध्वर्युर्गृह्णातीत्यादिस्मृतिरप्रमाणं श्रुत्यर्थविरुद्धत्वेन लोभमूलक
त्वात् तथा शिष्टाचारोपि स्मृतिद्वारा श्रुतिमूलकत्वात्प्रमाणं मातुलसुतापरिणयनादिशिष्टाचारस्त्वप्रमाणं मातुलस्य सुतामूढ्वा इति

दृष्टत्वात् निषिद्धत्वेन स्मृतिविरुद्धत्वान्न तदेवं श्रुतिस्मृत्याचाराणां धर्माधर्मयोः प्रमाणत्वमुक्तं स च धर्मः परस्परं भिन्नः भेदकप्रमाणानि तु शब्दां
न्तरादीनि तत्र यागदानहोमानां यजति ददाति जुहोतीत्यपर्यायशब्दप्रतिपाद्यत्वाच्च दानादिभेदः स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं
दानं समिधो यजति इत्यादीनां पंचानां वाक्यानां मध्ये एकस्य कर्मविधायकत्वमन्येषां तस्मिन् कर्मणि गुणविधायकत्वमिति तत्र नियाम
काभावात्सर्वेषां सर्वविधायकत्वे स्थिते विहितस्य कर्मणः पुनर्विधानवैयर्थ्यमिति पुनर्विधानसामर्थ्यात्पूर्ववाक्यविहितकर्मापेक्ष
यान्तरेण तद्वाक्यविहितस्य कर्मणो भेदः सिध्यतीत्येतादृशाभ्यासे न कोऽपि विशेषः पुनःश्रुतिरूपः यजति यदाभ्यासात्कर्मभेदः तिस्र आहु
तीर्जुहोतीत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोत्यर्थे होमे त्रित्वसंख्यान्वयात्तस्य परस्परं भिन्नास्त्रयो होमा इति संख्ययात्र कर्मभेदः अथैष ज्योति
रथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिरादीनां नाम्नां ज्योतिष्टोमसं
ज्ञापेक्षया पृथक्त्वं ज्ञात्वा तत्प्रकरणज्योतिष्टोमापेक्षया भेदः भिन्नसंज्ञावशादेव तत्र यागानां परस्परं भेद इति संज्ञया कर्मभेदः तप्ते पयसि दध्यान
यति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र सा वैश्वदेवीति वाक्ये विश्वेदेवदेवतामिक्षाद्रव्य
संबंधानुमितो यागो विधीयते वाजिनमित्यत्रापि वाजिदेवताकवाजिनद्रव्यकं कर्मान्तरं विधीयते न तु पूर्वविहिते वैश्वदेवयागे वाजिनद्रव्यरूपगुणो वि
धीयते पूर्वयागस्यामिक्षागुणेनावरुद्धत्वेन तत्र वाजिनस्य निवेशायोगात् न च व्रीहियववद्विकल्पः वाजिनामिक्षयोः समशिष्टत्वाभावा
त् विषमशिष्टयोर्विकल्पायोगात् वैश्वदेवयागोत्पत्तिवाक्येनामिक्षागुणः शिष्टस्तदुत्पत्तिशिष्टः विधीयते तत्पश्चात् वैश्वदेववाक्या
दन्यत्र कर्मणो वाक्यान्तरेण शिष्टो विहितो वाजिनगुण उत्पन्नशिष्टः तयोर्मध्ये उत्पत्तिशिष्टः प्रबलः कर्मोत्पत्तिवेलायामेव कर्मणाकांक्षितत्वात्

उत्पन्नशिष्टो वाजिनगुणेनान्तरः प्रमितोऽपि विलंवितत्वेन दुर्वलत्वात् स्वर्वकर्माणि निवेशमलभमानो वाजिरूपदेवतान्तरसंबंधात् स्वात्मस्य कर्मां
तरविधायकत्वमानयतीति गुणाद्भेदः तद्घनीभूतं पय आमिक्षा शीतं जलं वाजिनं तत् यथा कुंडपायिनामयने श्रूयते उपसद्भिश्चरित्वा
मासमग्निहोत्रं जुहोतीति अत्र पूर्वकर्म किंचिदपि संनिहितं न भवति अपूर्वकर्मसंनिधानरूपात्प्रकरणांतरात् अग्निहोत्र
धर्मकं तन्नामकं कर्मांतरं विधीयते न त्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुणविधिः प्राप्ते कर्मण्यानंतर्यमासरूपानेकगुण नित्याग्निहो
विधौ वाक्यभेदापत्तेरिति प्रकरणांतरात् कर्मभेदः प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रमिति यावदनंतदेवं शब्दांतराभ्यासंसंख्यासंज्ञागु त्र ५
णप्रकरणांतरैः कर्मभेदो दर्शितः तच्च वेदादिप्रमेयोऽर्थस्त्रिविधः क्रत्वर्थः पुरुषार्थः उभयार्थश्चेति प्रयाजादिः केवलक्रत्वर्थः यथा
फलं तत्करणं च पुरुषार्थः यथा ज्योतिष्टोमादिः स्वर्गादयश्च दध्यादि तत् अथ यद्रूपं दध्ना जुहुयादिति फलासंयुक्तवाक्येन क्रत्व यथा
र्थत्वात् दध्न इंद्रियकामस्य जुहुयादित्यनेन फलाय विधानात् पुरुषार्थत्वात् तदुक्तं एकस्य तूभयत्वे संयोगपृथक्त्वमिति संयोगो
वाक्यं तस्य पृथक्त्वं भेदः एकस्योभयार्थत्वे नियामकमित्यर्थः क्रत्वर्थप्रयाजादेः क्रतुः प्रयोजकः पुरुषार्थे फलं प्रयोजकं प्रयोज
कत्वं नाम अनुष्ठापकत्वमित्यर्थः विधिः प्र[illegible]र्थपदनुष्ठापयति स प्रयोजकः दर्शादिविधिः स्वर्गार्थं दर्शादिकमनुष्ठापयतीति
स्वर्गादिः दर्शादौ प्रयोजकः प्रयाजादिविधिः प्रयाजान् दर्शाद्यर्थं अनुष्ठापयतीति दर्शादिः प्रयाजानां प्रयोजकः दध्यानयनविधिः दध्यानयनमामिक्षार्थम
नुष्ठापयति न वाजिनार्थं आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतः सिद्धत्वात् आमिक्षैव दध्यानयने प्रयोजिका न वाजिनं पुरोडाशक
12 पालेन तुषानुपवपतीति तुषोपवापांगत्वेन पुरोडाशकपालं विधीयते तथापि तुषोपवापः कपालस्य प्रयोजको न भवति पुरोडाशार्थमुपात्ते

नैवं मुख्यकालेन तु सोमयागप्रसिद्धेः। किं तु पुरोडाशस्यैव कपालस्थस्य प्रयोजकत्वात्पूर्वं। ननु विधिनाङ्गप्रधानं कर्तव्यतया चोद्यते तेन
त्रेषां नां प्रधानानां कर्मणां बहुत्वात् क्रमेणानुष्ठानं वाच्यं तत्र क्रमनियामकं प्रमाणं किमिति चेत्तत्र श्रुत्यादीनामेव क्रमनियामक
त्वात् तथाहि अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीत्यत्र क्त्वाश्रुत्या गृहपतिदीक्षानन्तरं ब्रह्मदीक्षेति श्रौतः क्रमः। समि
धो यजति तनूनपातं यजतीत्यादौ विधिवाक्यपाठक्रमादेव समिधादियागानुष्ठानक्रमः। अग्निहोत्रं जुहोति यवागूं पचतीत्य
त्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमस्य कर्तुमशक्यत्वात् पाठक्रमं परित्यज्यार्थिकः क्रमः स्वीकर्तव्यः। अर्थः प्रयोजको
होमरूपः तदर्थक्रमः। अर्थक्रमः तेन पूर्वं पाकः पश्चाद्धोमः। तथा सप्तदश प्राजापत्यान् पशूनालभते इत्यत्र सप्तदशपशुष्वेव
प्राजापतिदेवताकाः सप्तदशयागाः कर्तव्यत्वेन चोदिताः। तेषामुपकरणत्वात् आद्यः पदार्थः यतः कुतश्चिदारभ्य यत्र क्वचन समा
पनीयः। नियोजनादिकं तु येन क्रमेणोपाकरणं प्रवृत्तं तेनैव क्रमेण कर्तव्यं कथं प्रकृतावग्नीषोमीयपशौ एकत्वेनोपाकरण
मादौ कृत्वा द्वितीयलक्षणमेव नियोजनं तत्रोपलक्षणमेव प्रोक्षणमन्यथा नेयं प्रयोजकाभावात्। अत्र तु सप्तदशपशूनां सहानुष्ठेय
त्ववचनात्प्रथमतोपकृतस्याचिन्त्यशेषस्य तमुपाकरणं स्वाश्रयकर्तव्यनियोजनापेक्षया षोडशभिः द्वितीयैः व्यवधानेन सह तेन तस्य
केनत्रोपाकरणक्रमेण नियोजने प्रथमपशावुपाकृतस्य व्यवधाने नियोजनं स्यात् नान्तरं प्रथमपशौ नियोजनकरणे षोडशान्त
राधिकरणव्यवधानं शास्त्राननुमतमापद्येत तन्निरासायोपाकरणे येन क्रमेण प्रवृत्तं तेनैव नियोजनादिकं कर्तव्यमिति

मा

तिप्रवृत्तिक्रमः तथा ज्योतिष्टोमे ऽग्नीषोमीयोपवसथ्यमारभ्य क्रमेणानुष्ठेयानामग्नीषोमीयसवनीयानुबंध्यानां पशूनां त्रयाणां
साद्यस्क्रे सोमयागे सहपशूनामालंभेन उत्पंकदानुष्ठानलक्षणं साहित्यं बोधितं तदपि सवनीयपशुस्थाने विहितं तत्रेश
कृ तत्क्रमं परित्यज्य सवनीयपशुस्थाने साहित्यविधानाद् आदौ सवनीयपशोरुपाकरणं ततोऽग्नीषोमीयस्ततोऽनुबंध्याया इ
३ ति स्थानात्क्रमः। श्रुत्यादिवशात्पूर्वे महत्येपवसथ्या तथा दर्शे सान्नाय्यपक्षे ऽमावास्यां शाखाच्छेदादीनां पूर्वमाग्नेयस्य मा॰
णं निर्वापादीनां चानंतरं प्रवृत्तावपि मुख्ययोराग्नेयसान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययाग॰
क्रमेणादावाग्नेयपुरोडाशस्य प्रयाजशेषेणाभिघारणं ततः पयसोऽभिघारणमिति मुख्ययागक्रमादभिघारण
क्रम इत्येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमैर्वैकर्मानुष्ठानं अन्यथानुष्ठाने वैगुण्यमित्यलमिति श्रीकृ
ष्णयज्वकृता मीमांसापरिभाषा समाप्ता

13